# मनोगतम् [०२.२१] 'मनकीबात', प्रसारण-तिथि:- २८-फेब्रुआरी,२०२१

[भाषान्तरं-डॉ.श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः, नमस्कारः । गतदिने मार्गशीर्ष-पूर्णिमायाः पर्व आसीत् । मार्गशीर्षमासः विशेषेण नदीभिः, सरोवरैः जलस्रोतोभिः च सम्बद्धः मन्यते । अस्माकं शास्त्रेषु कथितम् -

"माघे निमग्ना: सलिले सुशीते, विमुक्तपापा: त्रिदिवं प्रयान्ति ।।"

अर्थात् माघमासे कस्मिन्नपि पवित्रे जलाशये स्नानं पवित्रमिति मन्यते । जगति प्रत्येकमपि समाजे नद्या सम्बद्धा काचिदपि परम्परा भवति एव । नदी-तटेषु अनेकाः सभ्यताः विकसिताः । अस्मदीया संस्कृतिः सहस्रशो वर्ष-प्राचीना अतः अस्याः विस्तरः इतः परमपि अधिकतरः प्राप्यते । भारते कश्चन अपि एतादृशः दिवसः न भविष्यति यदा देशस्य कस्मिञ्चित् अपि कोणे जल-सम्बद्धः कश्चन उत्सवः न भवेत् । माघमासस्य दिनेषु जनाः स्वीयं गृह-परिवारं, सुख-सौविध्यं च परित्यज्य पूर्णे मासे नदीनां तटेषु कल्पवासं कुर्वन्ति । ऐषमः क्रमे हरिद्वारे कुम्भमेला अपि भवति । जलं हि अस्माकं कृते जीवनमपि, आस्था अपि, तथा च विकासस्य धारा अपि अस्ति । जलं हि अन्यतर-प्रकारेण पारसमणेः अपि अधिकतरं महतत्वपूर्णम् अस्ति । कथ्यते यत् पारसमणेः स्पर्शेन लोहः, सुवर्णे परिवर्तते । तथैव जलस्य स्पर्शः, जीवनस्य कृते आवश्यकः अस्ति, विकासार्थञ्च आवश्यकः वर्तते ।

सखायः, मार्गशीर्ष-मासस्य जलतत्त्वेन साकं प्रतीकारोपणस्य सम्भवतः अन्यकारणम् अप्यस्ति। यदेतत्पारं शीर्ततुः समाप्तिमायाति ग्रीष्मस्य पदाक्षेपश्च जायते। अत एव, जलसंरक्षणार्थम् अस्माभिः सद्यः एव प्रयासाः आचरणीयाः। कतिपय-दिनानन्तरं मार्चमासस्य द्वाविंशे दिने विश्वजलदिवसः अपि आयाति।

उत्तरप्रदेशस्य सुश्रिया आराध्या-महाभागया लिखितमस्ति यत्संसारे कोटिशः जनाः स्वीयजीवनस्य प्रभूतांशं जलावश्यकतां पूरयितुमेव यापयन्ति। अनेनैव कारणेन 'बिन पानी सब सून' इत्युक्तिः प्रसिद्धाऽवर्तत। जलसंकटं समाधातुं पश्चिमबंगस्य उत्तरदीनाजपुरतः सुजीतमहोदयेन उत्तमसन्देशः प्रेषितः। अनेन निगद्यते यज्जलं हि प्रकृत्याः सामूहिकोपहारः

इतिकृत्वा जलसंरक्षणस्य दायित्वमपि सामूहिकं भवितव्यम् । एतत्तथ्यं तु समीचीनं यद्यदि जलं सामूहिकोपहारः तदा तस्य संरक्षणमपि समूहेनैव कर्तव्यम्। सुजीतमहोदयस्यैषः परामर्शः समुचितः एवास्ति। नद्यः, तडागाः, सरोवराणि  वर्षाजलं भूजलं वा एतत्सर्वं, सर्वेषामपि कृते भवति।

सखायः, कदाचित् ग्रामेषु कूप-पल्वलादीनां संरक्षणं सर्वजनैः सम्भूय सम्पाद्यते स्म। साम्प्रतं एतादृशः प्रयासः तमिलनाडोः तिरुवन्ना-मलाईक्षेत्रे सम्भवति। अत्र स्थानीयजनैः कूपानां संरक्षणार्थम् अभियानं संचाल्यते। अत्रत्याः जनाः वर्षाकारणात्, क्षेत्रस्य सार्वजनिक-कूपानां पुनर्जीवनाय प्रशंसनीयं प्रयासमाचरन्ति।

मध्यप्रदेशस्य अगरोथा-ग्रामस्य बबीता-राजपूत-महोदयापि यत्करोति तत्सर्वेषां कृते उत्प्रेरकमस्ति। बबीतामहोदयायाः ग्रामः बुन्देलखण्डे अस्ति। ग्रामं निकषा कदाचित् बृहत्सरोवरम् अवर्तत यत्समयान्तरालेन शुष्कं जातम्। तया ग्रामस्य अन्यमहिलाभिः सम्भूय सरोवरं यावज्जलादानाय उरुकुल्यैका विरचिता। एतत्कुल्यया वर्षाजलम अजस्रं सरोवरे आगच्छति। साम्प्रतं चैतत्सरोवरम् आवर्षं जलाप्लावितं भवति।

सखायः, उत्तराखण्डस्य बागेश्वरवासिनः जगदीशकुनियालमहोदयस्य कार्यमपि प्रेरणास्पदमस्ति। जगदीशमहाभागस्य ग्रामः परिवर्तिक्षेत्रं च जलापूर्त्यै एकस्मिन्प्राकृतिकस्रोतसि निर्भरम् अवर्तत । परं कतिपयवर्षपूर्वं जलस्रोतः शुष्कम् अजायत, येन सम्पूर्णक्षेत्रे जलसंकटः आपतितः । जगदीशमहोदयेन एतज्जलसंकटस्य समाधानाय वृक्षारोपणं आरब्धम् । अनेन सहवासिभिः सम्भूय सहस्राधिकाः वृक्षाः आरोपिताः। साम्प्रतं चैतत् स्रोतः पुनः जलाप्लावितम्।

सखायः, जलविषये अस्माभिरपि सामूहिकदायित्वं स्वीकरणीयम् । भारतस्याधिकांशक्षेत्रेषु वर्षाकालः मे-जूनमासयोः आरभते । वयं यथासमयं स्वीयनिकटस्थानां जलाकराणां स्वच्छतायै, जलसंचयनाय च शतदिवसात्मकं अभियानं सञ्चालयितुं प्रयासं करवाम । एतेनैव विचारेण कतिपय-दिनानन्तरं जलशक्तिमन्त्रालयेन "कैच द रेन" इत्यभिधानात्मकं जलशक्त्यभियानं आरप्स्यते। अस्याभियानस्य मूलमन्त्रः "कैच द रेन, वेयर इट फाल्स, वैन इट फाल्स" इत्यस्ति। एतत्कृते वयं सत्वरं प्रयासं, जलसंरक्षणव्यवस्थानां संभरणं च कारयिष्यामः, ग्रामेषु तडागानां सरोवराणां च स्वच्छीकरणं सम्पादयिष्यामः, जलस्रोतोगतानां अवरोधानाम् उन्मूलनं च विधास्यामः, येन अधिकाधिकः वर्षाजलसंग्रहः सम्भाव्यः भवेदिति।

मम प्रियाः देशवासिनः, मार्गशीर्षमासस्य आध्यात्मिक-सामाजिक-महत्त्वस्य चर्चा सन्तवर्यस्य रविदासस्य नामोल्लेखं विना अपूर्णैव भवति। मार्गशीर्ष-मासस्य पूर्णिमायामेव रविदासजयन्ती समापतति। अद्यापि सन्तरविदासस्य शब्दाः, तस्य ज्ञानं चास्माकं मार्ग-प्रदर्शनं करोति। असाववादीत् -

एकै माती के सभ भांडे,

सभ का एकौ सिरजनहार।

रविदास व्यापै एकै घट भीतर,

सभ कौ एकै घंडै कुम्हार।।

वयमेकस्याः मृत्तिकायाः पात्राणि, एकया एव सर्वाणि विरचितानि। सन्त-रविदासेन सामाजिकविकृतयः मुक्तकण्ठेन निन्दिताः। तेनैतादृशाः विकृतयः न केवलमुद्घाटिताः अपितु तासां परिष्कारस्य मार्गोऽपि प्रशस्तीकृतः। तदेव मीरा अवादीत् -

गुरु मिलिया रैदास, दीन्हीं ज्ञान की गुटकी।

एतन्मम सौभाग्यं यदहं संतरविदासस्य जन्मस्थल्या काश्या संबद्धोऽस्मि। संतरविदासस्य आध्यात्मिकोत्कृष्टत्वं तस्य ऊर्जा च मया तत्तीर्थस्थले समनुभूतास्ति। सखायः, सन्तरविदासः अवादीत् -

करम बंधन में बन्ध रहियो, फल की ना तज्जियो आस।

कर्म मानुष का धर्म है, सत् भाखै रविदास।।

अस्यार्थः अयमेव यदस्माभिः स्वीयदायित्वं सदैवाचरणीयम्, फलं तु निश्चितमेव। एतस्य अयमपि अभिप्रायः यत्कर्मणैव सिद्धिर्भवति। अस्माकं युवजनैः संतरविदासात् अन्योऽपि एको गुणोऽधिगन्तव्यः । तैः किमपि कार्यसम्पादनार्थं पुरातन-विधिविधानानां बन्धनं नैव स्वीकर्तव्यम् । स्वीयजीवनपथः स्वयमेव निर्धारितव्यः, स्वयमेव च तस्य लक्ष्यं विधयश्चापि निश्चितीकर्तव्याः। यदि भवतां विवेकः आत्मविश्वासश्च सुदृढौ स्तः चेत् संसारे कस्मादपि नैव भेतव्यम् । एतस्मादहं कथयामि, यतो ह्यनेकशः अस्माकं युवानः पारम्परिक-विचार-पद्धतिवशेन स्वीय-मनोवांछितकार्यसम्पादात् वंचिताः जायन्ते । एवं भवद्भिः नूतनविचारार्थं सम्पादनार्थं वा संकोचः

नैव कर्तव्यः। एवमेव संतरविदासेन अन्यः एकः महत्सन्देशः प्रदत्तः। एषः सन्देशः स्वावलम्बनस्य अस्ति। वयं स्वीयस्वप्न-साकारीकरणार्थं परनिर्भराः कदापि नैव भवेम इति। यदपि पारम्परिकमस्ति तदैवाचरणीयमिति विचारः संतरविदासेन कट्वालोचितः। अद्य वयं पश्यामः यद्देशस्य युवानोऽपि एवमेव चिन्तयन्ति। यदाहं देशस्य युवजनानां नवाचारभावमनुपश्यामि तदानुभवामि यदस्माकं यविष्ठेषु संतरविदासः अवश्यमेव गर्वितः स्यात्।

मम प्रियाः देशवासिनः, अद्य 'राष्ट्रियविज्ञानदिवसः' अप्यस्ति। एष दिवसः भारतस्य महता वैज्ञानिकेन डॉ.सी.वी.रमणमहाभागेन सम्पादिताय 'रमण-इफैक्ट' इत्यनुसन्धानाय समर्पितोऽस्ति । केरलस्य योगेश्वरन्-महोदयेन 'नमोएप' उपरि लिखितं यत् अस्य अनुसन्धानस्य प्रभावेण विज्ञानस्य दिशा परिवर्तिता । एतेनैव सम्बद्धः अन्यसन्देशः नासिकस्य स्नेहिलमहोदयेन प्रेषितः। असौ लिखति यदस्माकं देशस्य अगणितैः वैज्ञानिकैः अपूर्वानुसन्धा- नानि सम्पादितानि यैर्विना विज्ञानं एतावद्विकासमवाप्तुं नैवापारयत्। यथा वयं संसारस्य अन्यवैज्ञानिकानां विषये जानीमः तथैव भारतीयवैज्ञानिकानां विषयेऽ- पि ज्ञातव्यम्। अहं 'मनकीबात'-श्रोतॄणां विचारैः सहमतोऽस्मि । अहं अवश्यमेव वाञ्छामि यदस्माकं युवजनाः भारतस्य वैज्ञानिकेतिहासं वैज्ञानिकांश्च जानन्तु अवगच्छन्तु, तेषां च विषये सविस्तरं पठन्तु।

वयस्याः, वयं यदा विज्ञानविषये सम्भाषामहे तदा जनसामान्यः विषयमेनं भौतिकी-रसायन-प्रयोगशालां च यावत् सीमितं करोति। परं वस्तुतः विषयोऽयम् इतोऽपि विस्तृततरः। आत्मनिर्भर-भारताभियाने विज्ञानशक्तेः महद्योगदानं वर्तते। अस्माभिः विज्ञानविषयः 'लैब टू लैण्ड' इति मन्त्रेण अग्रे नेतव्यः। सन्दर्भेऽस्मिन् हैद्राबादस्य चिंतला-वेंकटरेड्डीमहोदयस्य उदाहरणं ध्यातव्यमस्ति। अस्य चिकित्सक-मित्रं 'विटामिन-डी' इत्यस्य न्यूनतया आपद्यमानरोगाणां अपायानां च विषये तं सूचितवान्। श्रीरेड्डी कृषकः अस्ति, असौ अचिन्तयत् यदेतत्समस्यायाः समाधानं कथं कर्तुं शक्यते? तेन सुविचार्य गोधूम-तण्डुलानां एतादृक्प्रजातयः विकासिताः येषु विटामिन-डी इति जीवनसत्त्वस्य प्राचुर्यं वर्तते। अस्मिन्नेव मासे असौ जिनेवास्थितात् विश्वबौद्धिकसम्पदासंघटनात् एतत्कृते स्वत्त्वाधिकारम् अपि अर्जितवान् । एतत् अस्माकं सर्वकारस्य सौभाग्यं यदसौ विगतवर्षे 'पद्मश्री'-अलङ्करणेन सम्मानितः आसीत्।

एवमेव लद्दाखस्य उरगेन-फुत्सौगः अपि नवाचारयुतं कार्यं करोति। उरगेनः अत्युन्नतक्षेत्रेषु जैविककृषिमाध्यमैः प्रायशः विंशतेः खाद्यान्नानां उत्पादनं करोति । असौ स्वीयक्षेत्रेषु चक्रबद्धरीत्या

कार्यं करोति, यदनुसारेण पूर्वतनं कृष्यवशेषम् आगामिसस्यस्य पांसुत्वेन उपयोजयति। एतत्तु निश्चयेन आश्चर्यास्पदम् अस्ति।

एवमेव गुजरातस्य पाटण-जनपदनिवासिना कामराजभाईचौधरी इत्यनेन गृहे एव 'सहजन'-इत्यस्य उत्कृष्टबीजं विकासितमस्ति। कतिपयजनाः सहजनं 'सर्गवा' 'मोरिंगा' अथवा ड्रमस्टिक्-नाम्नापि जानन्ति। उत्तमबीजैः उत्पादितं सहजनफलमपि उत्कृष्टं भवति । साम्प्रतमसौ स्वीयोत्पादं तमिलनाडुं पश्चिमबंगालं च संप्रेष्य लाभमर्जयति।

सखायः, अद्यत्वे 'चिया-सीड्स' इत्यस्य बहु नाम भवद्भिः श्रुतं स्यात्। स्वास्थ्यं प्रति जागृतजनाः एनं सुबहु जानन्ति, संसारे चापि अस्य प्रभूतम्  अभ्यर्थनमस्ति । भारते त्वधिकांशतः अस्यायातः भवति । परमधुना केचन जनाः अस्मिन् क्षेत्रे आत्मनिर्भरतायै प्रयासमाचरन्ति । उत्तरप्रदेशस्य बाराबंकीक्षेत्रे हरिश्चन्द्रमहोदयेन चियासीड्सकृषिः आरब्धास्ति। एतेन न केवलं तस्यायः वर्धिष्यते, अपितु आत्मनिर्भर-भारताभियाने साहाय्यमपि सुनिश्चितमस्ति।

सखायः, कृष्यवकरैः धनोपार्जनस्यानेके प्रयोगाः अखिले देशे साकल्येन साफल्येन च संचाल्यन्ते। यथा मदुरैप्रदेशस्य मुरुगेसनमहाभागेन कदलीफला- वकरैः रज्जुनिर्माणस्योपकरणं विरचितमस्ति। मुरुगेसनमहोदयस्य नवाचारेण पर्यावरणस्य मालिन्यापाकरणस्य च समाधानं तु भविष्यत्येव, कृषकाणां कृते अतिरिक्तायस्य उपार्जनस्य मार्गोऽपि प्रशस्तः भविष्यति।

सखायः, 'मनकीबात' इत्यस्य श्रोतॄन् एतावतां जनानां विषये ख्यापनस्य मदीयम् उद्देश्यम् अस्ति, यद् वयं सर्वे एतेभ्यः प्रेरणां स्वीकुर्मः। यदा देशस्य प्रत्येकं नागरिकः स्वजीवने विज्ञानविस्तरं करिष्यति, प्रत्येकं क्षेत्रे करिष्यति, तदा प्रगतिमार्गाः उद्घाटिताः भविष्यन्ति देशश्च आत्मनिर्भरः  भविता । अथ अहं विश्वसिमि, देशस्य प्रत्येकं नागरिकः एतत् कर्तुं शक्नोति।

मम प्रियमित्राणि, कोलकातायाः रञ्जन-वर्येण स्वकीये पत्रे अत्यन्तं रुचिकरः आधारभूतश्च प्रश्नः पृष्टः अस्ति - सहैव, प्रभावपूर्णरीत्या तस्य उत्तरम् अपि लेखितुं प्रयतितम् तेन । सः लिखति - यदा वयम् आत्मनिर्भरतायाः चर्चां कुर्मः तदा अस्माकं कृते अस्य कोऽर्थः भवति? अस्य एव उत्तरे स्वयम् अनेन अग्रे लिखितम् यत् - 'आत्मनिर्भर भारत अभियान'' इत्यभियानं केवलं प्रशासनस्य एका शासकीययोजना नास्ति, अपितु राष्ट्रिया भावना अस्ति । सः मनुते यद् आत्मनिर्भरस्य अर्थः स्वजीवनस्य दैवनियन्त्री- करणम् इति, अर्थात् स्वयं स्वकीयस्य भाग्यस्य नियन्त्रकत्वार्जनम्। रञ्जन- महोदयस्य वार्ता प्रतिशतं शतमिता सम्यग् अस्ति । तस्य

विषयम् अग्रे नयता अहम् एतद् अपि वदामि यत् आत्मनिर्भरतायाः प्रथमः समयः भवति - स्वदेश- निर्मितेषु वस्तुषु गर्वाचरणम्, स्वदेशवासिनां निर्मितिषु गौरवाचरणम् । यदा प्रत्येकं देशवासी गर्वान्वितः भवति, प्रत्येकं सम्बद्धः भवति तदा 'आत्मनिर्भर- भारतम्" केवलं आर्थिकाभियानत्वेन न, एकस्याः राष्ट्रियभावनायाः तत्वेन परिलक्षितं भवति । यदा आकाशे अस्मद्देशनिर्मितं तेजस्-योद्धविमानं डयमानं पश्यामः, यदा भारतनिर्मितानि Tankइति योद्धदुर्गयानानि, भारतनिर्मितानि प्रक्षेपकास्त्राणि अस्माकं गौरवं वर्धयन्ति, यदा समृद्धदेशेषु मैट्रोरेलयानस्य भारतनिर्मितकक्षान् वयम् अवलोकयामः, यदा नैक-देशान् यावत् भारतनिर्मित- स्य कोरोणावैक्सीन् इति-सूच्यौषधस्य प्रापणं पश्यामः, तदा अस्माकं मस्तकम् इतोऽपि उन्नतं भवति। अथ एवं नास्ति यत् बृहद्-वस्तूनि एव भारतम् आत्म- निर्भरं करिष्यन्ति। भारते निर्मितानि वस्त्राणि, भारतस्य प्रतिभावद्भिः कार्मिकैः निर्मितानि हस्तनिर्मितवस्तूनि, भारतस्य Electronics इति वैद्युदाणविक-यन्त्रोपकरणानि, भारतस्य मोबाइल-इति जङ्गम-दूरभाषयन्त्राणि, प्रत्येकं क्षेत्रे अस्माभिः  भारतनिर्मितेः एषः गौरवः वर्धनीयः भवेत् । यदा अनेन चिन्तनेन सह वयम् अग्रेसराः भविष्यामः, तदा एव समुचितरूपेण आत्मनिर्भराः भविष्या- मः, अथ च मित्राणि, अहं प्रसन्नः अस्मि यत् आत्मनिर्भरभारतस्य अयं मन्त्रः देशे प्रतिग्रामं प्रसृतः भवति । बिहारस्य बेतिया-नगरे एतादृशम् एव अभवत् यस्य विषये सञ्चारमाध्येषु अहम् अपठम् ।

बेतियानिवासी प्रमोद-वर्यः, दिल्लीनगरे Technician इति प्रविधिज्ञरूपेण एकस्मिन् एल्.ई.डी-गोलदीपनिर्मातृ-समवाये कार्यं करोति स्म, समवायेऽस्मिन् कार्यावधौ पूर्णां कार्यप्रक्रियां सूक्ष्मतया अधीतवान् । परं कोरोणा-सङ्क्रमण-काले प्रमोदमहोदयस्य गृहं प्रति गमनम् अभवत् । भवन्तः जानन्ति प्रतिगमनानन्तरं प्रमोदमहोदयेन किं कृतम्, तेन स्वयं एल्.ई.डी.- निर्माणस्य लघुः एकांशः समारब्धः । स्वक्षेत्रस्य कतिपयान् यूनः स्वीकृत्य कतिपयमासेषु एव समवायकार्मिकतः समवायस्वामित्वग्रहणस्य यात्रा पूर्णीकृता। तदपि गृहे निवसता एव ।

एकम् इतोपि उदाहरणम् अस्ति - उत्तरप्रदेश-स्थितस्य गढमुक्तेश्वरस्य। गढमुक्तेश्वरतः श्रीमता सन्तोषेण लिखितम् यत् कथम् कोरोणाकालः तेन आपत्-अवसरत्वेन परिवर्तितः । सन्तोषवर्यस्य पूर्वजाः कुशलकार्मिकाः आसन्, आसननिर्माणं कुर्वन्ति स्म । कोरोणाकाले यदा अन्यानि कार्याणि अवरुद्धानि तदा एतैः अति-ऊर्जया उत्साहेन च आसननिर्माणं समारब्धम् । शीघ्रमेव न केवलम् उत्तरप्रदेशतः अपि तु अन्यराज्येभ्यः अपि आसनेभ्यः क्रयनिवेदनानि

आरब्धानि अभवन् । सन्तोषवर्येण एतद् अपि संसूचितम् यत् अनेन क्षेत्रस्य सहस्रवर्ष-पुरातनी सुन्दरकला अपि नवशक्तिं प्राप्नोत्।

मित्राणि, देशे एतादृशानि अनेकानि उदाहरणानि सन्ति, यत्र जनाः ''आत्मनिर्भर-भारत'' इत्यस्मिन् अभियाने एवंप्रकारेण योगदानं कुर्वाणाः वर्तन्ते । अधुना एषः भावः निर्मितः अस्ति यः सामान्यजनानां हृत्सु प्रवाहितः भवति।

मम प्रियाः देशवासिनः, मया नमो-एप् इति तन्त्रांशे गुरुग्रामनिवासिनः मयूरस्य एकः रुचिकरः लेखः पठितः। सः passionate bird watcher इति उत्साहिपक्षीद्रष्टा, अथ च प्रकृतिप्रियः अस्ति । मयूरमहोदयेन लिखितं यत् अहं तु हरियाणा-राज्ये वसामि परम् अहम् इच्छामि, यद् भवान्, असमवासिनां विशेषरूपेण काज़ीरंगावासिनां चर्चां कुर्यात् । अहम् अचिन्तयम् - मयूरः Rhinos-(राइनो)इत्येतेषां विषये कथयिष्यति, ये तत्रत्य-गौरवाः सन्ति। परं मयूर-महोदयेन काज़ीरंगायां वाटर-फाउल्स-इत्येतेषां संख्याभिवृद्धये असमवासिनः प्रशंसिताः सन्ति । अहम् अन्विषन् आसम्- वाटरफाउल्स कृते साधारणः शब्दः कः, तदा एकं शब्दं प्राप्नवं - जलपक्षी इति। एतादृशाः पक्षिणः, येषां वासः वृक्षेषु न, अपि तु जले भवति, यथा वर्तक- इत्यादयः । kaziranga national park, अथ Tiger reserve authority इत्यत्र किञ्चित् कालतः Annual waterfowls census इति प्रवर्तते। अनया गणनया जलपक्षीणां संख्या ज्ञायते, अथ च तेषां प्रियस्य वासस्य सूचनापि लभ्यते । सप्ताहद्वयं सप्ताहत्रयं वा पूर्वमेव गणना पुनः अभवत्। भवन्तः अपि ज्ञात्वा प्रसन्नाः भविष्यन्ति यत् ऐषमः जलपक्षीणां संख्या विगतवर्षा- पेक्षया प्रायशः प्रतिशतं पादोन-द्विशतसंख्यात्मिका वर्धितास्ति । ऐषमः गणनावसरे काज़ीरंगाराष्ट्रियोद्याने पक्षीणां द्वादशाधिकैकशतं प्रजातयः दृष्टिंगताः । एतासु अष्टपञ्चाशत्-प्रजातयः यूरोप-मध्यैशिया-पूर्वैशियाभागेभ्यः, अथ विश्वस्य विभिन्न-प्रभागेभ्यः आगताः शीतकालिकाः प्रवासिनः सन्ति । एतस्य महत्वपूर्णं कारणं जलसंरक्षणं मानवानां न्यूनहस्तक्षेपः च अस्ति । यद्यपि कुत्रचित् मानवानां सकारात्मकः हस्तक्षेपः अपि महत्वपूर्णः भवति। असमस्य श्रीजादव-पायेन्गमहोदयम् एव पश्यन्तु । भवत्सु केचन तस्य विषये अवश्यं जानन्तः स्युः । स्वकार्येभ्यः तेन पद्मसम्माननं प्राप्तम् । श्रीजादव-पायेन्गः सः जनः अस्ति येन असमस्थे मजूलीद्वीपे प्रायः त्रिशत-हेक्टेयर-परिमिते क्षेत्रे वृक्षारोपणार्थं सक्रिययोगदानं कृतं वर्तते । सः वनसंरक्षणार्थं कार्यं कुर्वन् भवति, अथ जनान् वृक्षारोपणार्थं जैवविविधता-संरक्षणार्थं च प्रेरयन् भवति।

मित्राणि, असमराज्ये अस्माकं मन्दिराणि अपि प्रकृतिसंरक्षणे स्वीयाः पृथग् पृथग् भूमिकाः निभालयन्ति सन्ति । यदि भवन्तः मन्दिराणि पश्यन्ति तर्हि ज्ञास्यन्ति यत् प्रत्येकं मन्दिरस्य पार्श्वे सरः भवति। हजो-स्थितं हयग्रीव-मधेब-मन्दिरम्, सोनितपुरस्य नागशंकरमन्दिरम्, अथ च गुवाहाटीस्थितस्य उग्रतारामन्दिरम्, एतेषां समीपं एतादृशानि नैकानि सरांसि सन्ति । एतेषां प्रयोगः विलुप्तिं जायमानानां कच्छप-प्रजातीनां संरक्षणाय क्रियते। असमराज्ये कच्छपानां सर्वाधिकाः प्रजातयः लभन्ते । मन्दिराणां एतानि सरांसि कच्छप-संरक्षणार्थं प्रजननार्थं तत्सम्बद्धप्रशिक्षणार्थं च उत्तमानि केन्द्राणि भवितुम् अर्हन्ति।

मम प्रियाः देशवासिनः, केचन जनाः चिन्तयन्ति यत् नवाचारार्थं वैज्ञानिकत्वम् एव अपेक्षते । केचन च चिन्तयन्ति - पाठनार्थं शिक्षकत्वम् अनिवार्यम् । एतत् चिन्तनं समाह्वानकर्त्री व्यक्तिः सर्वदा श्लाघनीया भवति। इदानीं, कश्चन कमपि यदि सैनिकनिर्माणाय प्रशिक्षितं करोति तर्हि किं तस्य सैनिकभवनम् अनिवार्यम्? भवन्तः चिन्तयन्तः स्युः, आम्, आवश्यकम् अस्ति । परम् अत्र किञ्चन वैशिष्ट्यम् अस्ति। MyGov इत्यत्र कमलाकान्त-महोदयेन सञ्चारमाध्यमस्य एकं वृत्तं प्रस्तुतीकृतं यद् भिन्नं विषयं प्रस्तौति। ओडिशायाम् अराखुडायां नायक-सर-इत्याख्यः एकः सज्जनः अस्ति । एवं तु एतस्य नाम सिलू-नायकः अस्ति परं सर्वे तं नायक-सर - इत्येवम् एव आकारयन्ति । वस्तुतः सः Man on mission इति स्वीकृतलक्ष्यजनः अस्ति। सः तान् यूनः निःशुल्कं प्रशिक्षयति, ये सेनायां प्रवेशम् इच्छन्ति। नायकवर्यस्य सङ्घटनस्य नाम 'महागुरु-बटालियन्' इति अस्ति। अस्मिन् शारीरक- स्वास्थ्यतः साक्षात्कारपर्यन्तम्, अथ च लिखितपरीक्षातः प्रशिक्षणपर्यन्तम्, एतेषाम् अंशानां विषये बोधनं क्रियते । भवन्तः ज्ञात्वा आश्चर्यान्विताः भविष्यन्ति यत् येभ्यः प्रशिक्षितं तैः जल-स्थल-वायु-CRPF-BSF-प्रभृतिषु सैन्यप्रभागेषु स्वीयं स्थानं निर्मितम् अस्ति। एतदपि ज्ञात्वा भवन्तः आश्चर्यान्विताः भविष्यन्ति यत् सिलू-नायकेन स्वयं ओडिशा-आरक्षि-बले प्रवेष्टुं यतितम् आसीत्। परम् असौ सफलतां न प्राप्नोत्। एवं जाते सत्यपि स्वीयेन प्रशिक्षणबलेन अनेके युवानः राष्ट्रसेवायै निर्मिताः। आयान्तु, वयं मिलित्वा नायकमहोदयाय शुभकामनाः दद्मः - यद् असमाकं देशाय इतोऽपि नायकान् सृजेत्।

मित्राणि, यदा कदा अत्यन्तं लघुः साधारणः च प्रश्नः मनः उद्वेलितं करोति । एते प्रश्नाः सुदीर्घाः न भवन्ति, अत्यन्तं सरलाः भवन्ति, तथापि अस्मान् विचारयितुं प्रतिबद्धान् कुर्वन्ति । कतिपयानि दिनानि पूर्वं हैदराबादस्य अपर्णारेड्डीः माम् एतादृशम् एव प्रश्नम् अपृच्छत् । सा

कथितवती - भवान् एतावन्ति वर्षाणि प्रधानमन्त्री, एतावन्ति वर्षाणि मुख्यमन्त्री चासीत्, कदापि एवम् अभासत यद् किमपि अवशिष्टम् अस्ति। अपर्णामहोदयायाः प्रश्नः यावान् सहजः अस्ति, तावान् एव कठिनः अपि वर्तते । अहम् प्रश्नविषये विचिन्त्य आत्मानम् अकथयम् यत् विश्वस्य सर्वतः प्राचीनां तमिलभाषां पठितुम् अधिकं यत्नं कर्तुं न शक्तवान्, अहं तमिलं पठितुं न शक्तवान् । एषा एका सुन्दरी भाषा अस्ति या विश्वे लोकप्रिया अस्ति । बहवः मां तमिलसाहित्यस्य गुणवत्तां, एतस्यां लिखितकवितानां गूढभावम् अवोचन्। भारतम् एतादृशीनां बहुभाषाणां स्थली वर्तते याः अस्माकं संस्कृतेः गौरवस्य च प्रतीकभूताः सन्ति । भाषाविषये कथयन् अहम् एकं लघु रुचिकरं ध्वन्यंशं भवद्भिः सह संविभाजयितुम् इच्छामि।

Sound clip .....

वस्तुतः इदानीं भवन्तः यत् शृणवन्तः आसन् तत् statue of unity- इत्यत्र, एका ‘guide’-मार्गदर्शिका संस्कृतभाषायां जनान् सरदारपटेलस्य विश्वस्य सर्वतः उन्नतप्रतिमायाः विषये वदन्ती अस्ति । एतत् ज्ञात्वा प्रसन्नताम् अनुभविष्यन्ति भवन्तः यत् केवडियायां पञ्चदशतः अपि अधिकाः पर्यटनमार्गनिर्देशकाः सन्ति ये धाराप्रवाहसंस्कृतेन विवर्णनं कुर्वन्ति । इदानीं पुनः एकं ध्वनिं श्रावयामि......

Sound clip Cricket

भवन्तः अपि स्तब्धाः स्युः । वस्तुतः एषः संस्कृतभाषया क्रियमाणः क्रिकेट्-क्रीडा-विवरणोद्घोषः अस्ति । काश्यां संस्कृतमहाविद्यालयेषु क्रिकेट्क्रीडा-स्पर्धा भवति । एते महाविद्यालयाः सन्ति - शास्त्रार्थमहा- विद्यालयः, स्वामिवेदान्तवेदविद्यापीठम्, श्रीब्रह्मवेदविद्यालयः, अथ च आन्ताराष्ट्रिय-चन्द्रमौलि-ट्रस्ट इति। अस्यां स्पर्धायां क्रीडावसरे उद्घोषः संस्कृतेन अपि क्रियते । इदानीं तस्य उद्घोषस्य लघु अंशः मया श्रावितः। न एतावदेव, अस्यां स्पर्धायां क्रीडकाः उद्घोषकाश्च पारम्परिके परिधाने दृष्टिंगताः भवन्ति । यदि भवन्तः शक्तिम् उत्साहं चिन्तां च सहैव अनुभवितुम् इच्छन्ति तर्हि क्रीडानां उद्घोषणाम् अवश्यं शृण्वन्तु । TV-इति दृश्यवाहिन्यागमनतः बहुपूर्वं क्रीडोद्घोषः एव सः माध्यमम् आसीत् येन क्रिकेट्-हॉकी-सदृशीक्रीडानां रोमाञ्चः देशवासिभिः अनुभूयते स्म । अस्माभिः दृष्टम् - यासु क्रीडास्पर्धासु उद्घोषः समृद्धः अस्ति, तस्याः प्रचार-प्रसारः तीव्रगत्या भवति । अस्माकं देशेऽपि बह्व्यः भारतीयाः क्रीडाः सन्ति परं तासु उद्घोषणपरम्परा नागता अनेन कारणेन ताः विप्लुततायाः

स्थितौ सन्ति । मम मनसि एकः विचारः आगतः - किमर्थं न पृथक् पृथक् क्रीडानां, विशेषतया भारतीयक्रीडानाम् उद्घोषः अधिकाधिकासु भाषासु भवेत्? अस्माभिः अस्य प्रोत्साहनविषये अवश्यं चिन्तनीयम् । अहं खेलमन्त्रालयं अथ निजीसंस्थानानां सहयोगिनः विषयेऽस्मिन् विचारयितुम् आग्रहं करिष्यामि।

मम प्रियाः युवसखायः, भाविनः केचन मासाः भवतां सर्वेषां जीवने विशेषं महत्वम् आवहन्ति | युवमित्राणाम् अधिकतरस्य परीक्षाः भविष्यन्ति | अपि स्मरन्ति भवन्तः सर्वे?– 'Warrior'-इति योद्धारः भवन्तु, 'worrier'-इति चिन्तातुराः नैव, हसन्तः एव परीक्षा-प्रदानार्थं गच्छेयुः, अपि च प्रहसन्तः एव प्रत्यागच्छेयुः | नापरेण केनचित्, आत्मना एव स्पर्धितव्यम् अस्ति | पर्याप्तं शयनीयमपि अस्ति, तथा च, 'time management'- काल-व्यवस्थापनमपि करणीयम् | क्रीडनम् अपि नैव त्यक्तव्यम्, यतो हि ये क्रीडेयुः, ते विकसेयुः | पुनरावृत्तेः हृदयीकरणस्य च शोभनाः पद्धतयः स्वीकरणीयाः, अर्थात् आहत्य, एतासु परीक्षासु स्वीयम् उत्कृष्टं बहिः निष्कासनीयम् अस्ति | भवन्तः विचारयन्तः स्युः - एतत् सर्वं कथं भविष्यति? वयं सर्वे मिलित्वा एतत् करिष्यामः | प्रत्येकं वर्षम् इव, अस्मिन् वर्षेऽपि वयं सर्वे करिष्यामः -'परीक्षा पे चर्चा' -इति परीक्षा-विषयिणीं चर्चाम् | परञ्च मार्चमासे सञ्जायमाना 'परीक्षा पे चर्चा' -तः प्राक् अहं भवतः सर्वान् परीक्षा-योद्धॄन्, पितरौ, शिक्षकान् च विनिवेदयामि यत् भवन्तः स्वीयान् अनुभवान्, नैजान् निर्देश-सङ्केतान् चावश्यं संविभाजयेयुः | भवन्तः MyGov- इत्यत्र संविभाजयितुं शक्नुवन्ति | NarendraModi App – इत्यत्र संविभाजयितुं शक्नुवन्ति | ऐषमः क्रमे 'परीक्षा पे चर्चा ' इत्यत्र युवभिः साकमेव, पितरौ, शिक्षकाः चापि आमन्त्रिताः सन्ति | कथं सहभागित्वं निर्वोढव्यम्, केन प्रकारेण पारितोषिकाणि जेतव्यानि, कया रीत्या च मया साकं चर्चावसरः अवाप्तव्यः? - एताः सर्वाः सूचनाः भवन्तः MyGov-इत्यत्र अवाप्तुं शक्नुवन्ति | अधुनावधि लक्षाधिकाः विद्यार्थिनः, प्रायेण चत्वारिंशत्-सहस्रं पितरौ, तथा च प्रायेण, दश-सहस्रं शिक्षकाः सहभागित्वं निरवहन् | भवन्तः अपि अद्यैव सहभागित्वं निर्वहन्तु | अस्मिन् कोरोना-कालखण्डे, किञ्चित्-कालं निष्काष्य मया exam warrior book-इति पुस्तके अपि केचन नूतनाः मन्त्राः संयोजिताः, साम्प्रतम् अस्मिन् पित्रोः कृतेऽपि केचन मन्त्राः संयोजिताः सन्ति | एतैः मन्त्रैः सम्बद्धाः विपुलाः रोचकाः च कार्यकलापाः NarendraModi App-इत्यत्र प्रदत्ताः, ये हि भवताम् अन्तःस्थितान् परीक्षायोद्धॄन् उद्दीपयितुं साहाय्यं विधास्यन्ति | भवन्तः नूनम् एतान् प्रयोक्तुं प्रयतेरन् | सर्वेषां युवमित्राणां कृते भावि-परीक्षाहेतोः भूयस्यः शुभकामनाः |

मम प्रियाः देशवासिनः, मार्चमासः अस्माकं वित्तीय-वर्षस्य अन्तिमो मासः अपि भवति, अतः भवत्सु अनेके जनाः अतितरां कार्य-व्यापृताः अपि भविष्यन्ति | अधुना, येन प्रकारेण देशे आर्थिक-कार्याणि तीव्रतराणि जायन्ते, तदनुरूपम् अस्माकं व्यापारिणाम् उद्यमिनां च मित्राणां व्यापृततापि एधतेतराम् | एतेषु सर्वेष्वपि कार्येषु सत्स्वपि अस्माभिः कोरोनातः अवधानं न मनागपि न्यूनीकरणीयम् | भवन्तः सर्वे स्वस्थाः स्थास्यन्ति, प्रसन्नाः भविष्यन्ति, कर्त्तव्य-पथि दृढाः स्थास्यन्ति चेत् देशः जवीयस्या गत्या सततम् अग्रे सरिष्यति |

भवतः सर्वेषां कृते पर्वणाम् उत्सवानां च कृते अग्रिमाः शुभकामनाः, युगपदेव कोरोना-सन्दर्भे येषामपि नियमानाम् अनुपालनं करणीयमस्ति, तत्र न मनागपि शैथिल्यं स्यात् | कोटिशो धन्यवादाः|

*****

[भाषान्तरं – डॉ.श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः – baldevanand.sagar@gmail.com